दिशिं दृशिं दंशिमथो मृशिं स्पृशिं रिशिं रुशिं क्रोशतिमष्टमं विशिम् ।
लिशं च शान्ताननिटः पुराणगाः पठन्ति पाठेषु दशैव नेतरान् ॥

देष्टा । द्रष्टा । दंष्टा । आम्रष्टा, आमर्ष्टा । स्प्रष्टा, स्पर्ष्टा । ऋदुपधानामुदात्तोपदेशानां मृजिदृशी वर्जयित्वा 'अनुदात्तस्य [1]चर्दुपधस्यान्यतरस्याम्' (६. १. ५९/२४०२) इति रमागमविकल्पः । रेष्टा । रोष्टा । क्रोष्टा । प्रवेष्टा । लेष्टा ।

रुधिः सराधिर्युधिबन्धिसाधयः क्रुधिक्षुधी शुध्यतिबुध्यती व्यधिः ।
इमे [2]तु धान्ता दश येऽनिटो मतास्ततः परं सिध्यतिरेव नेतरे ॥

रोद्धा । राद्धा । योद्धा । बन्द्धा । साद्धा । क्रोद्धा । क्षोद्धा । शोद्धा । बोद्धा । व्यद्धा । सेद्धा । बुध्यतिसिध्यत्योः श्यना निर्देशात् न्याय्यविकरणयोर्बुद्धिसिध्योरिड् भवत्येव । बोधिता । सिधिता । निष्ठायामपि प्रतिषेधाभावात् बुधितम्, सिधितम् इत्येव भवति ।

शिषिं पिषिं शुष्यतिपुष्यती त्विषिं विषिं श्लिषिं तुष्यतिदुष्यती द्विषिम् ।
इमान् दशैवोपदिशन्त्यनिड्विधौ गणेषु षान्तान् कृषिकर्षती तथा ॥

शेष्टा । पेष्टा । शोष्टा । पोष्टा । त्वेष्टा । वेष्टा । श्लेष्टा । तोष्टा । दोष्टा । द्वेष्टा । [3]क्रष्टा । कर्ष्टा । [4]कृषेस्तौदादिकस्य भौवादिकस्य [5]च कृषिकर्षती इति निर्देशः ।

तपिं तिपिं चापिमथो वपिं स्वपिं लिपिं लुपिं तृप्यतिदृप्यती सृपिम् ।
स्वरेण नीचेन शपिं छुपिं [6]क्षिपिं प्रतीहि पान्तान् पठितांस्त्रयोदश ॥

तप्ता । तेप्ता । आप्ता । वप्ता । स्वप्ता । लेप्ता । लोप्ता । तृप्यतिदृप्यत्योरनुदात्तत्वममागमार्थमेव[7] । इट् त्वनयोः रधादिपाठाद् विकल्पेन भवति । त्रप्ता, तर्प्ता, तर्पिता । द्रप्ता, दर्प्ता, दर्पिता । तुदादिषु तु यौ तृपिदृपी तावुदात्तावेव । स्रप्ता, सर्प्ता । शप्ता । छोप्ता । क्षेप्ता ।

अदिं हदिं स्कन्दिभिदिच्छिदिक्षुदीन् शदिं सदिं स्विद्यतिपद्यती खिदिम् ।
तुदिं नुदिं विद्यति विन्त इत्यपि प्रतीहि दान्तान् दश पञ्च चानिटः ॥

अत्ता । हत्ता । स्कन्ता । भेत्ता । छेत्ता । क्षोत्ता । शत्ता । सत्ता । स्वेत्ता । स्विद्यति इति श्यना निर्देशो 'ञिष्विदा' (धा. पा. ९७९) इत्यस्य ग्रहणं मा भूत् इति । उदात्त एवायम्[8] । पत्ता । खेत्ता । तोत्ता । नोत्ता । वेत्ता । विद्यति विन्त इत्यपि श्यना श्नमा च निर्देशोऽन्यविकरणनिवृत्त्यर्थः । वेत्तिविन्दती उदात्तौ एव । वेदिता [9]विद्यानाम् । वेदिता धनानाम् ।

---

1. चर्त्वपरस्य ड. 2. इमे उदात्ताः क. 3. आक्रष्टा आकर्ष्टा ब. ह. 4. कर्षतेः क. 5. ग्रहणम् क. 6. क्षिपान् क. 7. एव नास्ति क. 8. पठचते इत्यधिकम् क. 9. विद्यायाः फ.